दिनाङ्क :- 30.06.2024
प्रात: - 06: 55

**'मन कीबात'-कार्यक्रम:**

प्रधानमन्त्री नरेन्द्र-मोदी अद्य प्रातः एकादश-वादने आकाशवाणीतः 'मन कीबात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति। मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् एकादशाधिक-शत-तमं संस्करणं भविष्यति।
आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति। अयं हि आकाशवाणी-वार्ता-विभागस्य अन्तर्जाल-पटले www.newsonair.com इत्यत्र, अपि च newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्धः भविष्यति। आकाशवाणी-दूरदर्शनवार्ता-प्रधानमन्त्रीकार्यालय-सूचनाप्रसारण-कार्यालयानां यू-ट्यूब-वाहिनीभिः अपि अस्य कार्यक्रमस्य साक्षात्-प्रसारणं भविष्यति । हिन्दी-भाषायां प्रसारणस्य पश्चात् अस्य प्रसारणम् आकाशवाण्याक्षेत्रीयासु भाषासु अपि भविष्यति।

-

**लद्दाखम्/दुर्घटना**

लद्दाखक्षेत्रे एकस्मिन् युद्धाभ्यासोपक्रमे टैंकाख्य -युद्धोपकरणात्मक वाहनस्य निमज्जनेन पञ्चसैनिकाः वीरगतिम् अलभन्त। अभ्यासोपक्रमे आकस्मिकरूपेण समुत्पन्नेन जलाप्लावेन दुर्घटनेयं जाता, यत्र टैंकाख्यं-वाहनं श्योक इति नद्यां निमज्जितम्। एतां दुर्घटनां अभिलक्ष्य शोकं प्रकटयन् रक्षामन्त्री राजनाथसिंहः उक्तवान् यत् देशवासिनः वीरसैनिकानाम् अनुकरणीयां सेवां कदापि न विस्मरिष्यन्तीति।

**अमरनाथयात्रा**

हिमालय-पर्वतशृङ्खलायाः कश्मीरोपत्यकायां श्रीअमरनाथ-वार्षिकतीर्थयात्रा ह्यः औपचारिकरूपेण समारब्धा। द्विपञ्चाशद्दिवसीया इयं यात्रा अस्य वर्षस्य अगस्तमासस्य एकोनत्रिंशद्दिनाङ्के श्रावणपूर्णिमायाः शुभावसरे पूर्णतां यास्यति।

अमरनाथयात्रायाः शुभारम्भावसरे प्रधानमन्त्रिणा नरेन्द्रमोदिना एकस्मिन् सामाजिकसंदेशपटले प्रसारिते सन्देशे तीर्थयात्रिणः वर्धापिताः शुभाशंसिताश्च। श्रीमोदी उक्तवान् यत् बाबा-बरफानी इत्यस्य भगवतः शंकरस्य दर्शनपूजाभ्यां सन्नद्धेयं यात्रा भक्तेषु अप्रतिमोर्जायाः संचारं करोति। सः उक्तवान् यत् भगवतः शंकरस्य शुभाशीर्वचोभिः समेषां भक्तानां स्वस्तिस्यादिति।

**भारतीय-ऋतुविज्ञानविभागः**

भारतीयर्तुविज्ञान-विभागेन प्रोक्तं यत् दक्षिण-पश्चिम-प्रावृट् सम्प्रति राजस्थान-पश्चिमीयोत्तरप्रदेश-हरियाणा-दिल्ली-मध्यप्रदेशानाम् अवशिष्टभागान्, छत्तीसगढ़-पश्चिमबंगाल-झारखण्ड-बिहार-राज्यानां कतिपयभागान् च प्रति अग्रेसरति। विभागेनोक्तं यत् हिमाचलप्रदेशोत्तराखण्ड-हरियाणा-चण्डीगढ़-दिल्ली-उत्तरप्रदेश-पूर्वीयराजस्थान-मध्यप्रदेश-ओडिशा-कोंकण-गोवा-मध्यमहाराष्ट्रेषु कतिपयभागेषु च भूरिशः वृष्टेः सम्भावना वर्तते।

-

**एन्.डी.ए.परीक्षातिथयः**

एन्.डी.ए.-इति-राष्ट्रिय-परीक्षा-संघेन स्थगितानां निरस्तीभूतानाञ्च परीक्षाणां नूतनतिथय: घोषिता: सन्ति । एकस्याम् अधिसूचनायां संघेन उक्तं यत् विश्वविद्यालयानुदानायोगस्य राष्ट्रिय-पात्रता-परीक्षा: अगस्तमासस्य एकविंशति-दिनाङ्कत: सितम्बर -मासस्य चतुर्थदिनाङ्कं यावत् सम्पत्स्यन्ते।

क्रिकेट्

रोहित-शर्मण: नेतृत्वे भारतीयदलेन गतरात्रौ बारबाडोसे आयोजिते निर्णायके द्वन्द्वे आई.सी.सी.विंशति-प्रतिविंशति-विश्वचषकीय-क्रिकेट्-स्पर्धा-शृङ्खला विजिता। भारतेन दक्षिणाफ्रीका-दलं सप्त-धावनांकै: पराजितम्। पूर्व प्रथमं दण्डेन क्रीडता भारतेन विंशति-क्षेपचक्रेषु ऐतिहासिक-रूपेण षट्-सप्तत्यधिक-शतं धावनांका: अर्जिता:। प्रत्युत्तरे दक्षिणाफ्रीकादलम् उनसप्तत्यधिक-शतं धावनांकान् एव अर्जितुं अपारयत्।